॥ ओ३म् ॥

अथ वेदांगप्रकाशः

अव्ययार्थः

प्रकाशक—
आर्य साहित्य मण्डल लि०, अजमेर.

॥ ओ३म् ॥

अथ वेदाङ्गप्रकाशः

★ तत्रत्यः सप्तमो भागः ★

अव्ययार्थः

❀ पाणिनीयाष्टाध्याय्यां षष्ठो भागः ❀

श्रीमत्स्वामिदयानन्दसरस्वतीकृतव्याख्यासहितः ।

श्रीपण्डितयुधिष्ठिरमीमांसकेन संशोध्य
टिप्पणीभिरलंकृतः

पठनपाठनव्यवस्थायां नवमं पुस्तकम्

प्रकाशक—
आर्य साहित्य मण्डल लिमिटेड, अजमेर

प्रथमावृत्ति	संवत् २०१४	मूल्य
१०००	दयानन्दाब्द १३३	~~१)~~ आने

REVISED PRICE
2/06

मुद्रक:—
श्री शिरीशचन्द्र शिवहरे, एम० ए०,
दी फ़ाइन आर्ट प्रिंटिंग प्रेस, अजमेर

अथ भूमिका

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥

जो शब्दस्वरूप तीनों लिङ्ग, सातों विभक्तियों और इनके एकवचन, द्विवचन, बहुवचन (सात विभक्तियों के तीन २ के हिसाब से सात तिये इक्कीस वचनों) में एक से बने रहें अर्थात् जैसा उनका स्वरूप प्रथम हो वैसा ही मध्य और अन्त में भी बना रहे, जिनमें कोई विकार न हो, उनको अव्यय शब्द कहते हैं। इनका पाठ अकारादि क्रम से इस ग्रन्थ में लिखा है। ये अव्यय शब्द पद, वाक्य और क्रिया के साथ सम्बन्ध रखते हैं, और कहीं कहीं कोई कोई अव्यय प्रकृति के अर्थ को विलक्षण करके दिखला देता है। जैसे प्र, परा, वि, इत्यादि। "भवः" किसी का नाम वा संसार और "प्रभवः" उत्पत्ति, "जयः" जीत और "पराजयः" हार, "भूः" जो होता है और "विभुः" व्यापक इत्यादि। और "च, वा" आदि शब्द प्रकृति के अर्थ को बदलते नहीं, किन्तु सहायक होते हैं। जिसलिये वेदादि शास्त्रों में इनके प्रयोग आते हैं, इसलिये इनका अर्थ विदित करना कराना सबको उचित है, क्योंकि विना अर्थज्ञान के कुछ भी लाभ नहीं हो सकता। इस ग्रन्थ में तीन प्रकार का क्रम रक्खा गया है। प्रथम मूल अव्यय, दूसरे कोष्ठ में उनका अर्थ और तीसरे कोष्ठ में अव्ययों के उदाहरण रख दिये हैं[1]। इस ग्रन्थ को संस्कृत में बनाने का यही प्रयोजन है कि इस पुस्तक के पूर्व, सन्धि-विषय आदि ग्रन्थों को क्रमशः जो लोग पढ़ेंगे, उनको संस्कृत का समझना कुछ कठिन नहीं पड़ेगा और संस्कृत बोलने लिखने में भी उपयोगी होगा।

इति भूमिका

---

१. ग्रन्थ का आकार बदल देने से कोष्ठों को हटा कर तीनों कोष्ठों के पाठ तीन विभिन्न टाइपों में कर दिये हैं। यु० मी०।

सम्पादकीय वक्तव्य

ग्रन्थकार ने इस ग्रन्थ में अव्ययों का विभाग अवर्णादि क्रम के अनुसार किया है, परन्तु अर्थ निर्देश करते समय अकारादि वर्ण-क्रम का पूरा पालन नहीं हुआ। इससे विद्यार्थियों को अव्ययों के ढूंढने में बहुत कष्ट होता है। इस कष्ट को दूर करने के दो ही उपाय थे। एक—अव्ययों का निर्देश वैसे ही रहने दिया जाता, जैसा कि पहले छपता आ रहा है और अव्यय ढूंढने के कष्ट को कम करने के लिये अकारादि क्रम से सूची बना कर अन्त में लगा देते। दूसरा—ग्रन्थ के पाठ में बिना कुछ हस्तक्षेप किये अव्ययों को अकारादि क्रम से ही संकलित कर देते। प्रथम क्रम में हमें सुगमता थी, परन्तु विद्यार्थियों को पूरी पूरी सुगमता नहीं होती। उन्हें पहले सूचीपत्र देखना पड़ता, फिर उस उस पृष्ठ पंक्ति में अव्यय को ढूंढ पड़ता। इसलिये हमने इस ग्रन्थ के परिष्कार में द्वितीय क्रम का आश्रय लिया है। यद्यपि दूसरे क्रम में हमें लेखनादि का कार्य अधिक करना पड़ा, तथापि विद्यार्थियों को इस क्रम से पूरी सुगमता हो गई।

उदाहरण निर्देश में कई स्थानों पर अन्य ग्रन्थों के उद्धरण दिये हैं हमने उनके स्थान निर्देश करने का कुछ प्रयत्न किया। आशा है विद्यार्थी इससे पूरा पूरा लाभ उठावेंगे।

विदुषां वशंवदः—
युधिष्ठिर मीमांसक

❀ ओ३म् ❀

अव्ययार्थः

अ

अ = अभावे । अराजके तु लोकेऽस्मिन् सर्वतो विद्रुते भयात्[1] ।

अग्रतः, अग्रे = पुरार्थः । अग्रतो याहि । अग्रे गच्छ ।

अङ्ग = पुनरर्थसंबोधनयोः । मूर्खोऽपि नावमन्यते किमङ्ग विद्वान् । अङ्ग देवदत्त !

अञ्जसा = द्रुते स्वीकारे च । द्रुते—अश्वोऽञ्जसा धावति । स्वीकारे—अञ्जसा धर्ममाचर ।

अति = क्रान्तप्रकर्षोल्लङ्घनाऽतिशयपूजनेषु । क्रान्ते—मालामतिक्रान्तोऽतिमालः । प्रकर्षे—अत्युत्तमो विद्वान् । लङ्घने—अतिवेलं भुङ्क्ते । अतिशये—अतिबली देवदत्तः । पूजने—अत्यादृतः ।

अतीव = अतिशयार्थे । अतीव शोभते धर्मी ।

अथ = मङ्गलाऽनन्तराऽऽरम्भप्रश्नकात्स्न्र्याऽधिकारेषु । मङ्गले—अथातो ब्रह्मजिज्ञासा[2] । अनन्तरे—वेदमधीत्याऽथ धर्मो जिज्ञासितव्यः । आरम्भे—अथाध्येतव्यम् । प्रश्ने—अयं वक्तुं समर्थोऽथ न समर्थः ? । कात्स्न्र्ये—अथ वेदार्थं ब्रूमः । अधिकारे—अथ शब्दानुशासनम्[3] ।

अद्धा = स्वीकारे । विद्यामद्धावैहि ।

अद्य = वर्तमानेऽहनि । अद्याऽऽयाहि मया सह[4] ।

---

१. मनु ७ । ३ । तत्र 'हि' पाठः । २. वेदान्तदर्शन १ । १ । १ ॥

३. अष्टा० १ । १ । १ ॥ ४. अनुपबन्धमूलम् ।

अध = आनन्तर्येऽर्थे । भोजनं कृत्वाऽध गच्छ ।

अधरात्, अधरेण = अधोदिग्देशकालवाचकौ । अधरात् अधरेण [वा] गच्छेत्यादि ।

अधरेद्युः = अपरदिने । अधरेद्युस्त्वमागच्छेः ।

अधस् = अर्वाग्गतौ । वृक्षैरधः पतितः ।

अधस्तात् = अधोदिग्देशकालवाचकः । अधस्ताद् गच्छेत्यादि ।

अधि = उपरिभावैश्वर्यक्रियायोगेषु । उपरिभावे—अधिष्ठाता । ऐश्वर्ये—अधिराजः । क्रियायोगे—अधिगच्छेत् तु तान् स्वयम् ।

अधुना = वर्तमानकाले । अधुना गच्छामि ।

अनु = पश्चात् सादृश्यलक्षणेत्थम्भूताऽऽख्यानभागवीप्सासु । पश्चात्—गुरुमनुगच्छति शिष्यः । सादृश्ये—वेदमन्वाचरति विद्वान् । लक्षणे—वृक्षमनु विद्योतते विद्युत् । इत्थं भूताख्याने—साधुर्विद्वान् [गुरुम्] अनु । भागे—यदत्र मामनु स्यात् तद् देहि । वीप्सायाम्—पदं पदमनु चिन्तयति ।

अनुकम् = आनुकूल्ये । अनुकं गच्छ ।

अन्तर् = मध्ये । अन्तः शोचति ।

अन्तरा, अन्तरे, अन्तरेण = वर्जनमध्ययोः । वर्जने—विद्याम [न्तरा, अन्तरे, अ] न्तरेण कुतः शान्तिः । मध्ये—अनयोर्ग्रामयोरन्तरा नदी, अनयोन्तरे तिष्ठामि, [अनयो राज्ययोरन्तरेण पर्वतः] ।

अन्यत् = भिन्नेऽर्थे । अस्मादिदमन्यत् करोषि ।

अन्यतरेद्युः = अन्यस्मादन्यस्मिन् दिने । आगतोऽन्यतरेद्युः सः ।

अन्येद्यु = अन्यस्मिन् दिने । [अन्येद्युस्त्वमागच्छ] ।

अप = पृथग्भावे । अपेतः [पृथग्भूत इत्यर्थः] ।

अपरेद्युः = अपरदिने । अपरेद्युर्गमिष्यामि ।

अपष्टु = निन्दाशोभार्थयोः । निन्दायाम्—अपष्टु भृत्योऽयम् । शोभार्थे—अपष्टु पठत्ययम् ।

अपि = पदार्थसंभावनाऽन्ववसर्गगर्हासमुच्चयशङ्काप्रश्नेषु। पदार्थे—सर्पिषोऽपि स्यात्। संभावने—अपि सिञ्चेत् मूलकसहस्रम्। अन्ववसर्गे—अपि स्तुहि। गर्हायाम्—देवदत्तमपि कामिनम्। समुच्चये—पठापि पाठय। शङ्कायाम्—अपि चोरो भवेत्। प्रश्ने—त्वं किमपि जनासि ?

अभितः = समीपोभयतःशीघ्रसाकल्याऽभिमुखसर्वतोभावेषु। समीपे—प्रयागमभितो गङ्गा। उभयतः—अभितो भवतु सेना। शीघ्रे—अभितोऽधीष्व। साकल्ये—अभितो वनं दग्धम्। अभिमुखे—अभितो दीपे शलभाः पतन्ति। सर्वतोभावे—अभितो वर्षति मेघः।

अभीक्ष्णम् = वारंवारार्थे। अभीक्ष्णं विचार्यं वक्तव्यम्।

अम् = अङ्गीकारे। अमस्तु यत् त्वयोक्तम्।

अमा = सहसमीपयोः। सहार्थे—मित्रेणाऽमा भुङ्क्ते। समीपे—अमात्यो राजानमागच्छति।

अमुत्र = भवान्तरे। अमुत्र जायते जन्तुः[1]।

अरे = कनिष्ठसम्बोधने। अरे मैत्रेयि[2] !

अर्वाक् = अवरे। अर्वाग्गच्छ दुष्टात्मन् !

अलम् = भूषणपर्याप्तिशक्तिवारणेषु। भूषणे—विद्ययालंकृता कन्या। पर्याप्तौ—अलं भोक्ता। शक्तौ—अलं वीरो वीराय। वारणे—अलं महीपाल तव श्रमेण[3]।

अव = विनिग्रहक्रियायोगयोः। विनिग्रहे—अवग्रह [वृषल ! ते भूयात्]। क्रियायोगे—अवतिष्ठते।

अवश्यम् = निश्चये। सर्वैर्मनुष्यैरवश्यं वेदः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।

अवस् = रक्षणादिषु। अवो याहि।

असकृत् = वारंवारार्थे। असकृदध्यापनीया विद्यार्थिनः।

---

१. अनुपलब्धमूलम्। २. शतपथ १४। ३. रघुवंश २। ३४।

अस्तम् = अदर्शने। सायमस्तमितो रविः।

अस्ति = सत्त्वेऽर्थे। अस्तीदं जङ्गमं जडम्।

अस्तु = असूयाङ्गीकारयोः। असूयायाम्—अस्तु तवेदं कथनम्। अङ्गीकारे—अस्तु त्वद्वचः सत्यम्।

अह = विनिग्रहार्थीयः। अयमहेदं करोतु[1]।

अहह = अद्भुतखेदयोः। अद्भुते—अहह बुद्धिप्रकर्षो राज्ञः। खेदे—अहह मया कालो व्यर्थो नीतः।

अहो = विस्मये। अहो रूपं पश्य।

अहो बत = अनुकम्पाखेदयोः। अनुकम्पायाम्—अहो बत न हन्तव्यः। खेदे अहो बत मे मृतः पुत्रः।

अह्नाय = द्रुते। अह्नाय सूर्येण तमो निरस्तम्[2]।

आ

आ = वाक्यस्मरणयोः। वाक्ये—आ एवं नु मन्यसे। स्मरणे—आ एवं किल तत्।

आः = स्मृतिवाक्यानुकम्पासु। स्मृतौ—आः क गतं धनम्? वाक्ये—आः साधु पठसि। अनुकम्पायाम्—आः कथमिमं दुःखयसि।

आङ् = अर्वागीषदर्थक्रियायोगमर्यादाभिविधिषु। अर्वाञ्चि—आऽऽकाशाद् वायुः। ईषदर्थे—आपिङ्गलः। क्रियायोगे—आगच्छति। मर्यादायाम्—आसमुद्राद् राजदण्डः। अभिविधौ—आकुमारं यशःपाणिनेः।

आनुषक् = आनुकूल्ये। धर्मेणानुषग् वर्त्तितव्यम्।

आम् = अङ्गीकारे। आं करोमि त्वद्वचः।

आरात् = दूरसमीपयोः। दूरे—दुष्टादाराद् वसेत्। समीपे—श्रेष्ठादारात् वसेत्।

आविस् = प्राकट्ये। आविर्भाव्या सत्कीर्तिः।

---

१. निरुक्त १। ५॥ २. अनुपलब्धमूलम्।

आशु = शीघ्रार्थे । आश्वध्यापय ।

आस् = कोपपीडयोः । कोपे—आः पाप ! किं विकत्थसे ! पीडायाम्—आः ज्वरः किं करिष्यति ?

आहो = विकल्पे । अथ व्याकरणमधीत आहो निरुक्तम् ।

आहोस्वित् = प्रश्नपक्षान्तरयोः । प्रश्ने—त्वं काशीवास्याहोस्वित् मथुरावासी । पक्षान्तरे—त्वं वैशेषिकं पठस्याहोस्विन्न्यायम् ।

इ

इ = भेदरुषोक्त्यनुकम्पाऽपाकरणेषु । भेदे—इ अयं पुरुषोत्तमः । रुषोक्तौ—इ दुष्टं हिन्धि । अनुकम्पायाम्—इ पुत्र सुखीभव । अपाकरणे—इ यात्वितः खलः ।

इतरेद्युः = इतरस्मिन् दिने । इतरेद्युः स आगतः ।

इति = हेतुप्रकरणप्रकर्षादिसमाप्तिषु । हेतौ—शूरो हन्तीति कातरः पलायते । प्रकरणे—इति वदति पाणिनिः । प्रकर्षे—इत्याहाप्तः । क्रमे—इति व्याकरणमधीते । अनुक्रमे—इति वेदमध्यापयति पठित्वेत्यर्थः । समाप्तौ—इति प्रथमः पादः ॥

इदानीम् = वर्तमानकाले । इदानीमस्मि नीरोगः ।

इद्धा = प्रकाशे । इद्धा तपत्ययं राजा ।

इव = उपमायाम् । आप्त इवायं वदति ।

ई

ई = विषादानुकम्पयोः । विषादे—ई अयं दुःखं ददाति । अनुकम्पायाम्—ई अनाथः सुखी भवेत् ।

ईषत् = अल्पेऽर्थे । ईषदत्तमनेनास्मै ।

उ

उ = रुषोक्त्यनुकम्पानियोगसंबन्धपादपूरणेषु । रुषोक्तौ—उ उत्तिष्ठ दुष्टेतः । अनुकम्पायाम्—उ अभ्यौषधं कुरु । नियोगे—उ अयं द्वारि

तिष्ठतु । संबन्धे—उ अयं मम प्रियः । पादपूरणे—किमु कार्यं मयानघ[1] ।

उकञ् = उत्प्रेक्षायाम् । किमुक विद्यया सुखं भवेत् ।

उच्चैः = महत्यर्थे । उच्चैः पर्वताः सन्ति ।

उञ् = उत्प्रेक्षायाम् । किमु विद्वान् धार्मिकः स्यात् ।

उत = प्रश्नाप्यर्थविकल्पेषु । प्रश्ने—वेदमधीषे उताध्यापयसि ? । अप्यर्थे—मा [नो] वधीः पितरं मोत मातरम्[2] । विकल्पे—वेदं पठस्युत वेदाङ्गम् ।

उत्तरतः, उत्तरात्, उत्तरेण = एते उत्तरदिग्देशकालवाचकाः । उत्तरतः, उत्तरात्, उत्तरेण वा सन्ति, वसन्ति वेत्यादि ।

उत्तरेद्युः = आगामिदिने । उत्तरेद्युरहं गतः ।

उताहो = विकल्पार्थे । त्वं मीमांसां पठस्युताहो वैशेषिकम् ।

उद् = उत्कृष्टोर्ध्वक्रियायोगेषु । उत्कृष्टे—उत्तमः । ऊर्ध्वे—उद्गतः । क्रियायोगे—उद्यम्यते ।

उदक् = उत्तरदिग्देशकालवाचकः । उदक् सन्ति वसन्ति वेत्यादि ।

उप = उपजनसामीप्यक्रियायोगेषु । उपजने—उपक्रमः । सामीप्ये—उपकुम्भम् । क्रियायोगे—उपतिष्ठते ।

उपरि, उपरिष्टात् = ऊर्ध्वदिग्देशकालवाचकौ । उपरि, उपरिष्टाद्वा गच्छन्ति पक्षिणः ।

उपांशु = शनैर्जपेऽर्थे । उपांशु जपति ।

उभयेद्युः = उभयोर्दिनयोः । उभयेद्युः कृतं कार्यम् ।

उम् = प्रश्नेऽर्थे । उम् देवदत्तः क्व गतः ?

उररी = विस्ताराङ्गीकारयोः । विस्तारे—उररी करोति राज्यम् । अङ्गीकारे—उररी कुर्याद् धर्मम् ।

उषाः = रात्र्यवसानयोः । रात्रौ—उषा भवेत् तमोवृता । रात्र्यवसाने—उत्तिष्ठ उषा जाता ।

---

१. अनुपलब्धमूलम् । २. ऋग्वेद १ । ११४ । ७ ।

ऊ

ऊ = पक्षवाक्यारम्भानुकम्पासु । पक्षे—ऊ अयं मम सेवकः । वाक्यारम्भे—ऊ एवं नु मन्यसे । अनुकम्पायाम् —ऊ ते दुःखं विनश्यतु ।

ऊम् = रुषोक्तौ । ऊं शत्रुर्हन्तव्यः ।

ऊरी = विस्ताराङ्गीकारयोः । विस्तारे—ऊरी कुर्याद् विद्याम् । अङ्गीकारे—ऊरी कुर्याद् धर्मम् ।

ऊर्ध्वम् = ऊर्ध्वदिग्देशकालवाचकः । ऊर्ध्वं गच्छति वायुः ।

ऋ

ऋ = वाक्यगर्हणयोः । वाक्ये—ऋ त्वं किं सेवसे ? गर्हणे—ऋ गच्छ पापकृतम् ।

ऋते = वर्जनेऽर्थे । ऋते ज्ञानान्न मुक्तिः ।

ऋधक् = स्वीकारे । ऋधक् सत्संगतिं कुरु ।

ए

एकदा = कदाचिदर्थे । एकदाऽत्रागताः सर्वे ।

एतर्हि = वर्तमानकाले । एतर्ह्यधीते वेदम् ।

एव = अवधारणे । सत्यमेव वेदोक्तम् ।

एवम् = प्रकारोपमाऽङ्गीकारावधारणेषु । प्रकारे—एवं कुरु । उपमायाम्—एवं भूतो देवदत्तः । अङ्गीकारे—एवमस्तु वेदोक्तम् । अवधारणे—एवं विदुषां मतम् ।

ऐ

ऐ = अनुनये । ऐ धर्ममुपदिश ।

ऐषमः = वर्तमाने वर्षे । ऐषमो बालोऽयं मे ।

ओ

ओम् = प्रणवोपक्रमानुगतिषु । प्रणवे—ओं प्रणवः । उपक्रमे—

ओमित्येतदक्षरमुद्गीथमुपासीत[1] । अनुमतौ—ओमिदं सत्यमुक्तम् ।

क

कच्चित् = कामप्रवेदने । कच्चित् कुशलमस्ति ते ?

कण = श्रद्धाप्रतिघाते । कणे हत्य पयः पिबति ।

कदाचित् = कस्मिंश्चित् काले । कारणमन्तरा कार्यं कदाचिन्न जायते ।

कम् = वारिमूर्धसुखेषु । वारिणि—कं पिब । मूर्ध्नि—कं भूषय । सुखे—मह्यं कं देहि ।

कामम् = कामानुमतकामप्रवेदनयोः । कामानुमते—कामं त्वदीयं कार्यं करोमि । कामप्रवेदने—कामं मे पुत्रं पाठय ।

किञ्च = प्राक्पूर्वस्मिन्नवान्तरे । प्राक्पूर्वस्मिन्—व्याकरणं मयाधीतम् किञ्चान्यन्नाधीतम् । अवान्तरे—अनयोः पुरुषयोः किंचास्ति ।

किञ्चित् = अल्पे । किञ्चिदद्य मया भुक्तम् ।

किन्नु = प्रश्नवितर्कयोः । प्रश्ने—किन्नु तेनोक्तम् ? वितर्के—किन्नु नो दुःखं भवति ।

किम् = पृच्छाजुगुप्सनप्रश्नविकल्पक्षेपेषु । पृच्छायाम्—किं पठसि भोः ? जुगुप्सने—किं पण्डितो यः पक्षपाती । प्रश्ने—किमयं पुरुषः । विकल्पे—किमैहिकं कर्मजन्यं सुखं दुखं वा पूर्वजन्मकृतम् । क्षेपे—कश्चासौ राजा—किंराजा । [यो न रक्षति प्रजाम्]

किमु = संभावनाऽऽमर्शयोः । संभावनायाम्—किमु त्वं विद्यां पठिष्यसि ? आमर्शे—किमु तदेव स्यान्न वा ।

किमुत, किमूत = विकल्पे । त्वं न्यायमधीषे किमुत वेदान्तम् ? त्वमायुर्वेदमधीषे किमूत धनुर्वेदम् ?

किल = विद्याप्रकर्षनिश्चयवार्तासंभाव्येषु । विद्यायाम्—किलायं

---

१. छान्दोग्यो० १ । १ । १ ॥

विद्वान् । प्रकर्षे—किलेदं वस्तु ग्राह्यम् । निश्चये—एवं किलेदमस्ति । वार्तायाम्—जघान कंसं किल वासुदेवः[1] । संभाव्ये—विद्वांसं किलाश्रयेयुर्विद्यार्थिनः ।

कु = पापकुत्सेषदर्थेषु । पापे—कुकर्मी । कुत्सायाम्—कुपुरुषः । ईषदर्थे—कवोष्णम् ।

कुवित् = बले । कुवित् पुरुषः ।

कूपत् = कोपे । कथं कूपद् वदसि ।

केवाली = हिंसायाम् । केवाली करोति दुष्टान् ।

ख

खलु = निषेधवाक्यालंकारजिज्ञासानुनयेषु । निषेधे—खल्वधर्मान्निर्गच्छेत् । वाक्यालंकारे—एतत्खल्वाहुः । जिज्ञासायाम्—व्याकरणं खलु पठामि । अनुनये—विद्या खल्वध्यापय ।

खम् = आकाशब्रह्मणोः । आकाशे—खमाकाशम् । ब्रह्मणि—खं ब्रह्म[2] ।

ग

गुलगुधा = पीडार्थे । गुलगुधा करोति जन्तुः ।

च

च = अन्वाचयसमाहारेतरेतरसमुच्चयपादपूरणेषु । अन्वाचये—विद्यां पठ, गुरुं च सेवस्व । समाहारे—संज्ञा च परिभाषा च संज्ञापरिभाषम्[3] । इतरेतरस्मिन्—धर्मश्च अर्थश्च कामश्च मोक्षश्च ते धर्मार्थकाममोक्षाः[4] । समुच्चये—ईश्वरं च धर्मं च सेवस्व । पादपूरणे—स च प्राह सुशान्ताय[5] ।

---

१. महाभाष्य ३ । २ । २६ में उद्धृत । २. यजुः ४० । १७ ॥

३. देखो—कार्यकालं संज्ञापरिभाषम् (परि० २)

४. देखो—धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते । चाणक्यनीति ।

५. अनुपलब्धमूलम् ।

चटु = लौलुप्ये । चट्वयं भोजने ।

चण, चन = अल्पे । नास्ति किं चण । न जानासि किञ्चन ।

चित् = पूजोपमाऽवकुत्सितसाकल्येषु । पूजायाम्—आश्चर्य[1] चिदिदं ब्रूयात् । उपमायाम्—दधि चित् तक्रम् । अवकुत्सिते—कुल्माषांश्चिदाहर ।

चिरम्, चिररात्राय, चिरस्य, चिरात्, चिराय, चिरेण = चिरकालार्थाः । चिरं विद्या पठनीया । चिररात्राय संचितं वस्तु । चिरस्य दृष्ट्वैव मृतोत्थितेव[2] । चिरात् स क्व गतोऽस्ति । चिराय संतर्पय धनैः सुपात्रान् । चिरेणाऽऽगतोऽसि मित्र !

च्वि = अभूततद्भावसंपद्यार्थे । अशुक्लः शुक्लः संपद्यते, तस्य करणं, शुक्लीकरणम् ।

ज

जातु = कस्मिंश्चित् काले । न जातु कामः कामानामुपभोगेन शाम्यति[3] ।

जोक् = शाश्वते । जोक् पश्येम ।

जोषम् = सुखतूष्णीमर्थयोः । सुखे—जोषमासीत । तूष्णीम्—जोषं कुरु ।

झ

झटिति = द्रुतेऽर्थे । नटो वंशं झटित्यारोहति ।

---

१. यहां "आचार्यः" पाठ उचित है । तुलना करो—चिदित्येषोऽनेककर्मा । आचार्यश्चिदिदं ब्रवादिति पूजायाम् । दधिचिदित्युपमार्थे । कुल्माषांश्चिदाहर इत्यवकुत्सिते । निरुक्त १ । ४ ॥

२. अनुपलब्धमूलम् । ३. मनु० २ । ९४ ॥

त

तत्, ततः = हेत्वर्थे । यदयं याचते तदस्यमस्मै ददाति । यतोऽयं विद्वान् ततोऽयमध्यापयतु ।

तथा = साम्येऽर्थे । तथैवेदमस्ति ।

तथाहि = पूर्वसादृश्ये । तथाहि वद ।

तदा, तदानीम् = तस्मिन् कालेऽर्थे । क्व गतस्त्वं सखे तदा ? तदानीमागमिष्यामि ।

तावत् = मानावधिसाकल्यावधारणेषु । माने—तावद् भोक्तव्यं यावत् पच्येत । अवधौ—तावदध्येयं यावज्जीवनम् । साकल्ये—तावद् भुक्तं यावद्दत्तम् । अवधारणे—तावदामन्त्रयस्व यावच्छोत्रियम् [उपलभेः] ।

तिरस् = तिर्यगर्थे । तिरोदृष्ट्या समीक्षते ।

तूष्णीकाम्, तूष्णीम् = मौनेऽर्थे । कथं तूष्णीं स्थितो विद्वन् ? तूष्णिकां भव बालिश ।

त्वः = विनिग्रहार्थीयसर्वनामार्धनामसु । विनिग्रहार्थे—ऋचां त्वः पोषमास्ते[1] । सर्वनाम्नि—त्वे गच्छन्ति, त्वस्मै देहि । अर्धनाम्नि—गायत्रं त्वो गायति शक्करीषु[2] ।

द

दक्षिणतः, दक्षिणा, दक्षिणात्, दक्षिणाहि, दक्षिणेन = एते दक्षिणदिग्देशकालवाचकाः । दक्षिणतः, दक्षिणा, दक्षिणात्, दक्षिणाहि, दक्षिणेन, सन्ति वसन्ति वेत्यादि ।

दिवा = अहन्यर्थे । दिवा तमो निवर्तते ।

दिष्ट्या = आनन्देऽर्थे । दिष्ट्या ते दर्शनं भ्रातः ।

दुःषमम् = निन्द्यार्थे । दुःषमं खलु भाषितम् ।

---

१. ऋग्वेद १० । ७१ । ११ ॥

२. ऋग्वेद १० । ७१ । ११ ॥

दुर = निन्दार्थे । दुर्बुद्धिः ।

दुष्टु = निन्दायाम् । दुष्टु त्याज्यं वचस्त्वया ।

दोषा = रात्रौ रजनीमुखे च । रात्रौ—दोषा सतारका ख्याता । रजनीमुखे—दोषा सूर्योऽस्तं गतः ।

द्राक् = द्रुतेऽर्थे । द्राग्गच्छति नदी ।

ध

धिक् = निर्भर्त्सननिन्दयोः । निर्भर्त्सने—धिक् त्वामनधीतविद्यम् । निन्दायाम्—धिक् पापिनम् ।

ध्वंसकला = हिंसार्थे । ध्वंसकलाकृत्य गतः ।

न

नकिम् नाकिर्, नचेत् = आकांक्षायाम् । इदं नकिं कृतम् । नकिरिदमाचरणीयम् । त्वं सत्यं वद नचेत् त्वां दण्डेयम् ।

नञ् = प्रतिषेधे । अब्राह्मणाः ।

ननु = शङ्काविग्रहयोः । शंकायाम्—नन्वेवं कथमुच्यते । विनिग्रहे—नन्विदं कुरु ।

ननु च = प्रश्नदुष्टोक्त्योः । प्रश्ने—ननु चेदं किमस्ति । दुष्टोक्तौ—ननु चास्य वचोऽग्राह्यम् ।

नमस् = नतावर्थे । नमस्कुर्यान्मातरम्[1] ।

नह = प्रतिषेधे । नहासत्यं वदेयम् ।

नहि, ना = अभावेऽर्थे । नहि विद्वानधर्मे विचरति । ना दुष्टेषु रमेत ।

नाना = अनेकार्थे । नाना पदार्थाः ।

नाम = प्रकाशसंभाव्यक्रोधोपगमकुत्सनेषु । नाम—हिमालयो नाम नगाधिराजः[2] । संभाव्ये—भविष्यति नाम युद्धम् । क्रोधे—मम

१. वायवे नमस्कृत्य (चरक) चतुर्थ्यपि । २. मेघदूत १ । १ ॥

शत्रुर्नाम पापः । उपगमे—जानाति नाम विद्यया । कुत्सने—को नामायं प्रलपति सभायाम् ।

नि = विनिग्रहार्थीयः । नियमः ।

निः षमम् = निन्द्येऽर्थे । निःषमं वदसि त्वं मूर्ख ?

निकषा = अन्तिके । निकषागच्छ सन्मित्रान् ।

निर्, निस् = निश्चयनिषेधयोः । निश्चये—निरुक्तोऽर्थो यास्केन । निषेधे—अधर्मो निष्काशनीयः ।

नीचैस् = निन्द्याधोऽर्थयोः । निन्द्ये—नीचैर्धीस्तवास्ति विषय-सेवनात् । अधोऽर्थे—नीचैर्गच्छति पापात्मा ।

नु = क्षिप्रप्रच्छाविकल्पेषु । क्षिप्रे—नु गच्छ । प्रच्छायाम्—कोऽनु-धर्मोऽस्ति ? विकल्पे—अयं पण्डितो न्वयं पण्डितः ।

नूनम् = निश्चये । नूनं धर्मः सेवनीयः ।

नेत् = निषेधे । नेद् गच्छेद् ग्रामम् ।

नो = अभावऽर्थे । नो अधार्मिकान् सेवेत ।

नोचेत् = आकाङ्क्षायाम् । त्वं पठ, नोचेत् दुःखी भविष्यति ।

प

परम्, परमम् = अङ्गीकारेऽर्थे । परमाप्तोक्तम् । परमयुक्तं त्वयानघ ।

परश्वस् = परात्परागामिदिने । परश्व आगमिष्यामि ।

परा = प्रकर्षानुत्कर्षयोः । प्रकर्षे—परागतः । अनुत्कर्षे—पराजयः ।

परारि = पूर्वतरे वर्षे । परारि जाता कन्येयम् ।

परितस् = सर्वतोभावे । आयान्तु परितः श्रियः ।

परुत् = वर्तमानात् पूर्वे वर्षे । परुज्जातो बालः ।

परेद्यवि = परेऽहनि । परेद्यव्यागतो विद्वान् ।

पश्चात् = प्रतीचीचरमयोः । प्रतीच्याम्—पश्चादस्तं गतो रविः । चरमे—पश्चाद्वयसि संन्यसेत् ।

पाट् = संबोधनेऽर्थे । पाट् यज्ञदत्त !

पुनःपुनः = वारंवारार्थे । पुनःपुनः सत्पुरुषाः सेवनीयाः ।

पुनर् = भेदाप्रथमनिश्चयपश्चादर्थेषु । भेदे—किं पुनर्विद्वांसो धार्मिकाः । अप्रथमे—पुनरुक्तमनेन । निश्चये—किं पुनर्ब्राह्मणाः पुण्याः[1] । पश्चादर्थे—पुनर्जन्म ।

पुरः, पुरतः = सन्मुखार्थे । पुरो गच्छ । पुरतः पठ ।

पुरस्तात् = प्राचीप्रथमदेशकालेषु । प्राच्यां—पुरस्तादुदेति सूर्यः । प्रथमे—पुरस्ताद् गच्छ । देशे काले च—पुरस्ताद् देशे काले वा प्राप्तम् ।

पुरा = प्रबन्धचिरातीतनिकटाऽऽगामिषु । प्रबन्धे—पुरा पठितव्यः । चिरातीते—पुरातनमिदम् ।

पृथक् = वर्जनार्थे । दुष्टः पृथक् कार्यः ।

प्याट् = संबोधने । प्याट् देवदत्त !

प्र = प्रकर्षगताद्यर्थयोः । प्रकर्षे—प्रभुः । गताद्यर्थेषु—प्रगत आचार्यः प्राचार्यः ।

प्रगे = प्रभातेऽर्थे । प्रगे सर्वैर्न शयितव्यम् ।

प्रति = प्रतिनिधिप्रतिदानलक्षणेत्थम्भूताख्यानभागवीप्सासु । प्रतिनिधौ—मन्त्री राज्ञः प्रति । प्रतिदाने—तिलेभ्यः प्रति माषान् देहि । लक्षणे—वृक्षं प्रति विद्योतते विद्युत् । इत्थंभूताख्याने—प्रगल्भं प्रति संभाषणीयम् । भागे—इदं मां प्रति स्यात् । वीप्सायाम्—वृक्षं वृक्षं प्रति सिञ्च ।

प्रत्यक् = पश्चिमदिग्देशकालवाचकः । प्रत्यग्गच्छन्त्यागच्छन्ति ।

प्रबाहुकम् = प्राबल्ये । प्रबाहुकं कुर्वन्ति दस्यवः ।

प्रसह्य = हठार्थे । कथं प्रसह्य करोषि ?

---

१. गीता ।

प्रसीम् = प्रसर्गसीमासर्वतोभावेषु। प्रसर्गे—प्रसीमादित्योऽसृजत्[1]। सीमायाम्—प्रसीं समुद्रं गच्छेत्। सर्वतो भावे—प्रसीं वायुर्वाति।

प्राक् = अतीतपूर्वदिग्देशकालवाचकः। अतीते—प्रागासीज्जगदुत्पत्तिः। पूर्वादिशि—प्राग्गच्छन्तु गता वा। देशे काले च—प्राग्देशे काले वा।

प्रातर् = प्रभातेऽर्थे। प्रातः स्नाहि यदीष्टं स्यात्।

प्रादुस् = नामप्रकाशप्राकट्येषु। नाम्नी—प्रादुरासीद् युधिष्ठिरः[2]। प्रकाशे—प्रादुरासीत् तमोनुदः[3]। प्राकट्ये—प्रादुस्कृता त्वया विद्या।

प्राध्वम् = बन्धनानुकूलार्थयोः। बन्धने—प्राध्वं चोरो मया। आनुकूल्ये—प्राध्वं मित्रो मया।

प्रायस् = बहुधार्थे। अस्मिन्नगरे प्रायो धनाढ्याः सन्ति।

प्रेत्य = भवान्तरे। प्रेत्यात्र जायते जन्तुः।

फ

फट् = शैघ्र्ये। फट् वद।

फली, फलू = विकारेऽर्थे। फलीकृत्य, फलूकृत्य।

ब

बत = खेदानुकम्पासंतोषविस्मयाऽऽमन्त्रणेषु। खेदे—बत महत् कष्टम्। अनुकम्पायाम्—बतायमरोगः स्यात्। सन्तोषे—मात्रा पुत्रो बतालिङ्गितः। विस्मये—किमिदं बत दृश्यते। आमन्त्रणे—एहि बत सुखं भुङ्क्ष्व।

बलवत् = अतिशयार्थे। बलवन्निगृह्णाति।

---

१. ऋ० २। २८। ४॥ निरुक्ते तु 'सीम्' निपात इत्युक्तम्। यथाह निरुक्तकारः—सीम् इति परिग्रहार्थीयो वा पदपूरणो वा—प्र सीमादित्योऽसृजत्। प्रासृजदिति वा, प्रासृजत् सर्वत इति वा। निरुक्त १। ७॥

२. अनुपलब्धमूलम्।

३. अनुपलब्धमूलम्।

बहिर् = बाह्येऽर्थे । बहिष्कार्यो दुष्टात्मा ।

बहुलम् = बहुधार्थे । उणादयो बहुलम्[1] ।

बाट् = आनुकूल्ये । बाड् गच्छेत् ।

भ

भाजक् = विभागे । भाजगन्नं देयं भिक्षुभ्यः ।

भूयस् = पुनःपुनरधिकार्थयोः । पुनःपुनरर्थे—भूयस्तेऽहं प्रवक्ष्यामि[2] । अधिकार्थे—भूयो देहि सत्पात्राय ।

भोः = संबोधने । भो शिष्य ! सद्यः पठ ।

भ्रंसकला = हिंसार्थे । भ्रंसकलाकृत्य ।

म

मङ्क्षु = द्रुतेऽर्थे । मङ्क्षु धावन्ति मृगाः ।

मनाक् = अल्पेऽर्थे । मनाङ्मुक्तं कथं त्वया ।

मा = वारणे । मा कुर्वधर्मं मनः ।

माकिम् = निषेधे । माकिमसत्यं वदेत् ।

मात्रायाम् = अल्पे । रुग्णेन मात्रायां भोक्तव्यम् ।

मास्म = वारणे । मास्म कुर्या इदं पुत्र !

मिथ्या, मुधा = व्यर्थकेऽर्थे । मिथ्येदं वचनं वेदविरुद्धम् । मुधा मूर्खा भ्रमन्त्यत्र ।

मुहुः = वारंवारेऽर्थे । मुहुर्द्रष्टव्यो वेदः ।

मृषा = व्यर्थकेऽर्थे । मृषा वदति धूर्तोऽयम् ।

मो = वारणे । मो अहं द्विषे धर्मम् ।

य

यत्, यतः = हेत्वर्थे । यदयं याचते तदिदं ददामि । यतोऽयं विद्वांस्ततो धार्मिकः ।

---

१. अष्टा० ३ । ३ । १ ॥ २. गीता ॥

यथा = सादृश्यापरभावयोः । सादृश्ये—यथा देवदत्तस्तथा विष्णुमित्रः पठति । अपरभावे—यथा धावति ।

यथायथम् = यथावदर्थे । यथायथं वदत्याप्तः ।

यथार्थम् = सत्येऽर्थे । यथार्थं वदति धर्मात्मा ।

यथावत् = योग्येऽर्थे । यथावत् कर्म करोति विद्वान् ।

यथाश्वम् = यथावदर्थे । यथाश्वं धर्मं पालयति ।

यथो = सादृश्यापरभावयोः । सादृश्ये—यथो देवदत्तस्तस्था विष्णुमित्रः पठति । अपरभावे—यथो धावति ।

यावत् = मानावधिसाकल्यावधारणेषु । माने—यावद् बुद्धिस्तावदध्येयम् । अवधौ—यावद् ब्रह्मचर्यं तावदध्येयम् । साकल्ये—यावद् वेदार्थं तावदधीतम् । अवधारणे—यावद् [क्षुद्] भोक्तव्यम् ।

युगपत् = सहार्थे । आगता युगपत् सर्वे ।

र

रे, रै = नीचसंबोधने । रे वा रै जन !

व

व, वत् = साम्येऽर्थे । इदं व तत् । तद्वदिदम् ।

वरम् = अङ्गीकारे । वरं विप्रः सुयन्त्रितः ।

वर्षाली = हिंसायाम् । वर्षालीकृत्य ।

वशम् = स्वाधीनतायाम् । शत्रून् वशं नयेत् ।

वषद् = वाक्यार्थे । इन्द्रो वषट् वर्षति ।

वा = उपमाननिश्चयार्थविकल्पेषु । उपमायाम्—सिंहो वा क्रुद्धो भवति । निश्चये—सत्यं वाप्तैः सुसेवितम् । विकल्पे—व्याकरणं पठसि वा वेदम् ।

वि = पृथग्विशेषार्थयोः । पृथगर्थे—विगतः । विशेषार्थे—विशिष्टः ।

विक्ली = हिंसायाम् । विक्लीकृत्य ।

विश्वक्, विश्वतस् = सर्वतोभावे । विश्वगवस्थितं ब्रह्म । विश्वतो धर्ममाचरेत् ।

वृथा = व्यर्थकेऽर्थे । वृथा पुष्टो देवदत्तः ।

वेलायाम् = समये । वेलायां भोक्तव्यम् ।

वै = पादपूरणनिश्चयार्थयोः । पादपूरणे—अहं त्वां वच्मि वै हितम् । निश्चये—सत्यं वै सततं ब्रूयात् ।

वौषट् = वाक्यार्थे । बालो मातुर्वौषड् वसेत् ।

श

शकला = हिंसायाम् । शकलाकृत्य ।

शकृत् = मले । शकृत् कृतं वत्सेन ।

शम् = सुखकल्याणयोः । सुखे—शमस्तु ते । कल्याणे—शङ्करः ।

शमुपजोषम् = आनन्दे । शमुपजोषं सेवन्ताम् ।

शश्वत् = पुनःसदार्थयोः । पुनरर्थे—शश्वत् सन्ध्यामुपासीत् । सदार्थे—शश्वत् सत्यं वदेत् ।

शु = शीघ्रे । शु पठ ।

श्रौषट् = वाक्यार्थयोगे । जिज्ञासुर्विदुषः श्रौषट् गच्छेत् ।

श्वस् = अनागतेऽहनि । श्वो गन्तास्मि तवान्तिकम् ।

स

संवत् = वर्षे । प्रभवो नाम संवत् ।

सकृत् = सहैकवारयोः । सह—सकृद् गच्छन्तु भृत्याः । एकवारे—सकृद्विवाहं कुर्यात् ।

सजूः = सहार्थे । सजूर्गच्छन्ति भृत्याः ।

सत् = आदरे । सत्कृत्य, सत्कृतम्, यत् सत्करोति ।

सत्रा = संगेऽर्थे । मया सत्रा को गच्छेत् ।

सदा = सर्वस्मिन् काले । धर्मः सदा नरैः सेव्यः ।

सद्यः = द्रुतेऽर्थे । सद्यो याहि ।

सनत्, सना, सनात्, सनुतर् = सर्वदाऽर्थे । सनद्विद्यां सेवन्ताम् । सनातनः । सनाद् बुद्धिं वर्धयति विद्वान् । सनुतः पुरुषार्थे प्रयतेरन् ।

सपदि = द्रुतेऽर्थे । सपदि धावत्यश्वः ।

सम् = एकीभावाऽऽनन्दयोः । संगतं घृतं तैले । समागतः सत्पुरुषान् ।

समन्ततस् = सर्वतोभावे । मेघो वर्षति समन्ततः ।

समम् = सङ्गेऽर्थे । पित्रा समं न विवदितव्यम् ।

समया = अन्तिकमध्ययोः । अन्तिके—समया नगरं नदी । मध्ये—समया शैलं ग्रामः ।

सम्प्रति = युक्तवर्तमानयोः । युक्ते—क्रमशो वच्मि सम्प्रति । वर्तमाने—सम्प्रति गच्छामि ।

सम्यक् = दृढप्रशंसयोः । दृढे—सम्यग् धार्मिकः । प्रशंसायाम्—सम्यगध्यापकः ।

सर्वतस् = सर्वतोभावे । सर्वतो वाति पवनः ।

सर्वदा = सर्वस्मिन् काले । सर्वदा सुखमास्तव्यम् ।

सह = सङ्गेऽर्थे । विदुषा सह मन्त्री सदा रक्षेत् ।

सहसा = अतर्कितबलात्कारयोः । अतर्किते—सहसा करोत्यर्थं सदा । बलात्कारे—सहसा विदधीत न क्रियाम्[1] ।

साकम् = संगेऽर्थे । राज्ञा साकं गच्छन्तु ।

१. किरातार्जुनीय । २ । ३० ॥

साक्षात् = तुल्यप्रत्यक्षयोः । तुल्ये—साक्षात् सिंहोऽयं वीरः । प्रत्यक्षे—साक्षान्मुनिर्मया दृष्टः ।

साचि = तिर्यगर्थे । साचि गमनं करोति सर्पः ।

सामि = अर्धजुगुप्सयोः । अर्धे—सामि पठितं व्याकरणम् । जुगुप्सायाम्—साम्यधर्मः सेवितोऽनेन ।

साम्प्रतम् = युक्तवर्तमानार्थयोः । युक्ते—क्रमशो वच्मि साम्प्रतम् । वर्तमाने—साम्प्रतं गच्छामि ।

सायम् = सन्ध्यासमये । सायं सन्ध्यामुपासीरन् ।

सार्धम् = सङ्गेऽर्थे । सार्धमागतोऽध्यापकः ।

सीम् = सीमायाम् । वि सीमतः सुरुचो वेन आवः[1] ।

सु = पूजने । सुपुरुषः ।

सुष्ठु = प्रशंसायाम् । सुष्ठु काव्यं पठसि त्वम् ।

सूपत् = सहार्थे । सूपद् गच्छन्ति भृत्याः ।

स्थाने = युक्तेऽर्थे । अयं तिष्ठतु राज्ञः स्थाने ।

स्म = अतीते । भवति स्म विद्याऽऽढ्यो देवदत्तः ।

स्रंसकला = हिंसायाम् । स्रंसकलाकृत्य ।

स्राक् = द्रुतेऽर्थे । स्राक् पठति बुद्धिमान् ।

स्वधा = वाक्यार्थयोगे । पितृभ्यः स्वधा ।

स्वयम् = आत्मार्थे । स्वयमिच्छामि पठितुम् ।

स्वस्ति = आशीःक्षेमपुण्येषु । आशीः—स्वस्ति ते भूयात् । क्षेमे—स्वस्ति गच्छ । पुण्ये—स्वस्तिमान् सुखमाप्नोति ।

स्वाहा = वाक्यार्थयोगे । अग्नये स्वाहा ।

स्वित् = प्रश्नवितर्कयोः । प्रश्ने—देवदत्त ! किं स्वित् पठितमस्ति ? वितर्के—अधिकं पाण्डित्यं देवदत्ते स्विद् विष्णुमित्रे ।

---

१. ऋ० २ । ११ । २१ ॥

ह

ह = अवधारणविनिग्रहार्थपादपूरणेषु । अवधारणे—अयमिदं ह करिष्यति । विनिग्रहे–अयमिदं ह करोतु[1] । पादपूरणे–तं ह्याध्यापयति प्राज्ञः ।

हन्त = हर्षविषादानुकम्पावाक्यारम्भे । हर्षे—हन्त लाभो महान् प्राप्तः । विषादे—हन्त नष्टो बन्धुर्मे । अनुकम्पायाम् —हन्त दीनो रक्षितव्यः । वाक्यारम्भे—हन्त ते कथयिष्यामि ।

हा हा = खेदहास्ययोः । खेदे—हा हा पुत्रो मृतो मे । हास्ये—हा हा तव का वार्ता ।

हि = हेत्वपदेशानुपृष्टाऽसूयाऽवधारणपादपूरण विस्मयेषु । हेत्वपदेशे—इदं हि करिष्यति[2] अनुपृष्ट—कथं हि करिष्यति[3] । असूयायाम् —कथं हि व्याकरिष्यति[3] । अवधारणे—इदं हि कर्त्तव्यम् । पादपूरणे—अहं हि यास्यामि वरं वरं तव[4] । विस्मये—बलं हि वीरस्य समीक्ष्यतां नराः[4] ।

हिरुक् = वर्जनेऽर्थे । हिरुग्धर्मेण कुतः सुखम् ?

हूम् = वितर्कपरिप्रश्नयोः । वितर्के—दुःखमिदानींतनेन कर्मणा, हूं पुरातनेन । परिप्रश्ने— हूं देवदत्त ! त्वया किं किमधीतम् ।

हे, है = संबोधने । हे विद्वन्नुपविश । है अध्यापक पाठय ।

हो = विस्मये । हो वीरेण बहुकृतम् ।

ह्यस् = गतदिने । ह्यः सखायं समागच्छत् ।

---

१. निरुक्त १ । ५ । २. तुलना कार्या—निरुक्त १ । ५ ।

३. निरुक्त १ । ५ । ४. अनुपलब्धमूलम् ।

अथ कृत्तद्धिताव्ययानि

[कृत्—] से, असेन्, असे, असेन्, क्से, क्सेन्, अध्यै, अध्यैन्, कध्यै, कध्यैन्, शध्यै, शध्यैन्, तवै, तवेङ्, तवेन्, कै, इष्यै, कै तवै, केन्, केन्य, त्वन्, एश, क्त्वा, तोसुन्, कसुन्, णमुल्, कमुल्, तुमुन्।

[तद्धित—] तसिल्, त्रल्, ह, दा र्हिल्, धुना, दानीम्, थाल्, थमु, था, अस्ताति, अतसुच्, आति, एनप्, आच्, आहि, असि, धा, क्त्वसुच्, सुच्, शस्, ध्यमुञ्, धमुञ्, आम्, अम्, तसि, वति, ना, नाञ्, च्विर, साति, त्रा, डाच्।

कृतः

से, असेन्, असे, असेन्, क्से, क्सेन्, अध्यै, अध्यैन्, कध्यै, कध्यैन्, शध्यै, शध्यैन्, तवै, तवेङ्, तवेन् = तुमर्थे छन्दसि। से—वक्षे रायः, धनानि वोढु मित्यर्थः। सेन्—तावामेषे रथानाम्, युवां रथान् गमयितुं समर्थौ इत्यर्थः। असे, असेन्—क्रत्वे दक्षाय जीवसे जीवितुमित्यर्थः। क्से—प्रेषे भगाय। क्सेन—श्रियसे। अध्यै, अध्यैन्—कर्मण्युपाचरध्वै। कध्यै, कध्यैन्—इन्द्राग्नी आहुवध्यै। शध्यै, शध्यैन्—सह मादयध्यै। तवे—ब्राह्मणेन न म्लेच्छितवै। नापभाषितवै। तवेङ्—दशमे मासि सूतवे। तवेन्—स्वर्देवेषु गन्तवे।

कै, इष्यै = तुमर्थे छन्दसि[२]। कै—प्रयै देवेभ्यः, प्रयातु मित्यर्थः। इष्यै—अपामोषधीनां रोहिष्यै, रोहणयेत्यर्थः, अव्यथिष्यै, अव्यथनायेत्यर्थः।

१. तुमर्थेसेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः। अष्टा० ३। ४। ९॥

२. प्रयै रोहिष्यै अव्यथिष्यै। अष्टा० ३। ४। १०॥

के = तुमर्थे छन्दसि[1]। दृशे विश्वाय सूर्यम्※, द्रष्टुमित्यर्थः, विख्ये, विख्यातुमित्यर्थः।

तवै, केन्, केन्य, त्वन् = कृत्यार्थे छन्दसि[2]। तवै—परिधातवै, परिधातव्यम् इत्यर्थः। केन्—नावगाहे, नावगाहितव्यम् इत्यर्थः। केन्य—शुश्रूषेण्यः, शुश्रूषितव्य इत्यर्थः। त्वन्—कर्त्वं हविः†, कर्तव्यमित्यर्थः।

एश् = कृत्यार्थे छन्दसि[3]। नावचक्षे, नावख्यातव्यमित्यर्थः।

क्त्वा = प्रतिषेधार्थैः अलंखलु योगे[4], समानकर्तृकयोः पूर्वकाले[5], व्यतीहारे वा[6]। अलं खलु वा कृत्वा, पठित्वा पाठयेत्, अपमित्य याचते।

तोसुन् = ईश्वरशब्दे उपपदे तुमर्थे भावलक्षणे स्थादिभ्यो वा छन्दसि[7]। ईश्वरोऽभिचरितोः, अभिचरितुं समर्थ इत्यर्थः। आसंस्थातोर्वेद्यां सीदन्ति।

कसुन् = ईश्वरशब्दे उपपदे भावलक्षणे वर्तमानयोः सृपितृदोस्तुमर्थे वा छन्दसि[8]। ईश्वरो विलिखः, विलिखितुं समर्थ इत्यर्थः। पुरा क्रूरस्य विसृपः+, विस्रप्तुमित्यर्थः। पुरा जर्तृभ्य आतृदः×, आतर्दितुमित्यर्थः।

णमुल् = शक्युपपदे वेदे[9] समानकर्तृकयो पूर्वकाले[10] वा सर्वत्र।

---

१. दृशे विख्ये च। अष्टा० ३। ४। ११॥ ※ ऋ० १।१४२।६॥

२. कृत्यार्थे तवैकेन्केन्यत्वनः। अष्टा० ३। ४। १४॥

३. अवचक्षे च। अष्टा० ३। ४। १५॥ † अथर्व १। ४। ३॥

४. अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा। अष्टा० ३। ४। १८॥

५. समानकर्तृकयोः पूर्वकाले। अष्टा० ३। ४। २१॥

६. उदीचां माङो व्यतीहारे। अष्टा० ३। ४। १९॥

७. ईश्वरे तोसुन् कसुनौ। अष्टा० ३। ४। १३॥ + यजु० १। २८॥

८. सृपितृदोः कसुन्। अष्टा० ३। ४। १७॥ × तै० आ० ४।२०।१॥

९. शकि णमुल्कमुलौ। अष्टा० ३। ४। १२॥

१०. अभीक्ष्ण्ये णमुल् च। अष्टा० ३। ४। २२॥

अग्निर्वैदेवा विभाजं नाशक्नुवन्, विभक्तुमित्यर्थः। स्मारं स्मारं वेदवचोऽधीते, स्मृत्वा स्मृत्वेत्यर्थः।

कमुल् = शक्युपपदे छन्दसि[1]। अग्निमपलुपं नाशक्नुवन्, अपलोप्तुमित्यर्थः।

तुमुन् = क्रियार्थायां क्रियायामुपपदे[2]। भोक्तुं व्रजति, भोजनायेत्यर्थः।

तद्धिताः

तसिल् = पञ्चम्यन्तात्[3]। कस्मात्, काभ्यां, केभ्यः इति कुतः। सर्वस्मात्, सर्वाभ्याम्, सर्वेभ्यः इति सर्वत इत्यादि।

त्रल् = सप्तम्यन्तात्[4]। सर्वस्मिन्निति सर्वत्र।

ह = इदमः,[5] किमो वा = सप्तम्यन्ताद्वेदे[6]। अस्मिन्नन्नयोरेष्विति, इह। कुहाभिपित्वं करतोः, कुत्र चिदस्य सा दूरे, क ब्राह्मणस्य चावकाः?।

दा = सर्वादिभ्यः काले[7]। सर्वस्मिन् काले, सर्वदा। कस्मिन् काले, कदा। यस्मिन् काले, यदा। तस्मिन् काले, तदा।

र्हिल् = काले[8]। एतस्मिन् काले, एतर्हि। कस्मिन् काले, कर्हि। तस्मिन् काले, कर्हि। यस्मिन् काले यर्हि।

धुना = इदंशब्दात् काले[9]। अस्मिन् काले, अधुना।

---

१. शकि णमुल् कमुलौ। अष्टा० ३। ४। १२॥
२. तुमुन् णमुलौ क्रियायां क्रियार्थायाम्। अष्टा० ३। ४। १०॥
३. पञ्चम्यास्तसिल्। अष्टा० ५। ३। ७॥
४. सप्तम्यास्त्रल्। अष्टा० ५। ३। १०॥
५. इदमो हः। अष्टा० ५। ३। ११॥
६. किमोत्, वा हः च च्छन्दसि। अष्टा० ५। ३। १२, १३॥
७. सर्वैकान्यकिंयत्तदः काले दा। अष्टा० ५। ३। १५॥
८. इदमोर्हिल्। अष्टा० ५। ३। १६॥
९. अधुना। अष्टा० ५। ३। १७॥

दानीम् = इदंतच्छब्दाभ्यां काले[1]। अस्मिन् काले, इदानीम्। तस्मिन् काले, तदानीम्।

थाल् = प्रकारवचने[2]। सर्वेण, सर्वाभ्यां, सर्वैश्च प्रकारे, सर्वथा। एवमेव, यथा तथा इत्यादि।

थमु = इदमः किमश्च[3]। अनेन, आभ्याम्, एभिश्च प्रकारैः, इत्थम्। केन, काभ्यां, कैश्च प्रकारैः, कथम्।

था = प्रकारवचने, किमो हेतौ छन्दसि च[4]। सर्वथा। किम हेतौ—कथा ग्रामं न पृच्छसि, केन हेतुना न पृच्छसीत्यर्थः।

अस्ताति = सप्तमीपञ्चमीप्रथमान्ताद् दिग्वाचिनो दिग्देशकालेषु[5]। प्राच्यां दिशि, पूर्वस्मिन् देशे काले वा; पूर्वस्यादिशः, पूर्वस्माद्देशात् कालाद् वा; पूर्वा दिक्, पूर्वो देशः, पूर्वः काल इति—पुरस्तात्।

अतसिच् = दक्षिणादिभ्योऽस्तात्यर्थे[6]। दक्षिणातो वसति। दक्षिणत आगतः। दक्षिणतो रमणीयम्। परतो वसति, परत आगतः, परतो रमणीयम्। एवमेव उत्तरत इत्यादि। परस्ताद् वसति, अवरतोऽवस्ताद् वसति इत्यादि च। प्राग्वसति, प्रागागतः, प्राग् रमणीयम् इत्यादि च।

---

१. दानीं च। अष्टा० ५। ३। १८॥

२. प्रकारवचने थाल्। अष्टा० ५। ३। २३॥

३. इदमस्थमुः, किमश्च। अष्टा० ५। ३। २४, २५॥

४. था हेतौ च च्छन्दसि। अष्टा० ५। ३। २६॥

५. दिक्शब्देभ्यः सप्तमी पञ्चमी प्रथमाभ्यो दिग्देशकालेस्वस्तातिः। अष्टा० ५। ३। २७॥

६. दक्षिणोत्ताराभ्यामतसुच्, विभाषा परावराभ्याम्, अञ्चेर्लुक्। अष्टा० ५। ३। २८–३०॥

आति = उत्तराधरदक्षिणाद् अस्त्यात्यर्थे[1] । उत्तराद् अधराद् दक्षिणाच्च वसति, आगतः, रमणीयं चेत्यादि ।

एनप् = सप्तमीप्रथमान्तादुत्तरादिभ्योऽस्तात्यर्थेऽदूरे[2] । उत्तरेणावरेण, दक्षिणेन वसति इत्यादि ।

आच् = सप्तमीप्रथमान्ताद् दक्षिणाशब्दादस्त्यात्यर्थे[3] । दक्षिणा वसतीत्यादि ।

आहि = अस्त्यत्यर्थे दक्षिणाद्दूरे[4]। दक्षिणाहि वसन्ति, दूरे इत्यर्थः ॥

असि = पूर्वादिभ्योऽस्तात्यर्थे[5] । पूरोऽधोऽवश्च वसतीत्यादि ।

धा = विधार्थे द्रव्यविचाले वा संख्यातः[6] । एकविध इत्येकधा, एवं द्विधा, बहुधा, त्रिधा, चतुर्धा इत्यादि ।

ध्यमुञ् = उक्तधाप्रत्ययादेशोऽन्यतरस्यामेकशब्दतः[7] । ऐकध्यम् ।

धमुञ् = द्वित्रिभ्यां धाप्रत्ययादेशः[8] । द्वैधम्, त्रैधम् ।

एधाच् = द्वित्रिभ्यां धा प्रत्ययादेशो वा[9] । द्वेधा, त्रेधा ।

---

१. उत्तराधरदक्षिणादातिः । अष्टा० ५ । ३ । ३४ ॥

२. एनबन्यतरस्यामदूरेऽपञ्चम्याः । अष्टा० ५ । ३ । ३५ ॥

३. दक्षिणादाच् । अष्टा० ५ । ३ । ३६ ॥

४. आहि च दूरे । अष्टा० ५ । ३ । २२ ॥

५. पूर्वाधरावराणामसि पुरधवश्चैषाम् । अष्टा० ५ । ३ । ३९ ॥

६. संख्याया विधार्थे धा, अधिकरणविचाले च । अष्टा० ५।३।४२,४३॥

७. एकाद्धो ध्यमुञन्यतरस्याम् । अष्टा० ५ । ३ । ४४ ॥

८. द्वित्र्योश्च धमुञ् । अष्टा० ५ । ३ । ४५ ॥

९. एधाच्च । अष्टा० ५ । ३ । ४६ ॥

कृत्वसुच् = क्रियाभ्यावृत्तिगणने[1] । पञ्चकृत्वोऽधीतोऽनुवाकः, पञ्चवारमित्यर्थः । एवमेव षट्कृत्व इत्यादि ।

सुच् = क्रियाभ्यावृत्तिगणने[2] । दिनस्य द्विरधीते, त्रिरधीते, चतुरधीते, एकस्मिन् दिवे द्विवारं, त्रिवारं, चतुर्वारं वा पठतीत्यर्थः ।

शस् = बह्वल्पार्थात् कारके[3] । अल्पशो ग्रन्थानधीतवान्, अल्पानित्यर्थः । बहुशो वित्तं गृह्णाति, बहुवित्तमित्यर्थः ।

आम् = घप्रत्ययान्तात् किमादिभ्योऽद्रव्यप्रकर्षे[4] । किन्तराम्, किन्तमाम्, पचतितराम्, जल्पतितमाम्, उच्चैस्तराम् ।

अम् = उक्तार्थे छन्दसि[5] । प्रतरं नयामः ।

तसि = प्रतियोगे पञ्चम्यन्तात्[6] । प्रद्युम्नः कृष्णात् प्रति । आदितः, मध्यतः, अन्ततः ।

वति = तृतीया षष्ठी सप्तम्यन्तात्तुल्ये[7] । स्थानिवत्, ब्राह्मणवत्, आद्यन्तवत्, इत्यादि ।

ना, नाञ् = पृथग्भाववाचिभ्यां विनञ्भ्यां स्वार्थे[8] । विना, नाना ।

च्वि = कृभ्वास्तियोगे सम्पद्यकर्तरि[9] । भस्मीभवति, पात्रीकरोति ।

---

१. संख्यायाः क्रियाभ्याभ्यावृत्तिगणने कृत्वसुच् । अष्टा० ५ । ४ । १७ ॥

२. द्वित्रिचतुर्भ्यः सुच् । अष्टा० ५ । ४ । १८ ॥

३. बह्वल्पार्थाच्छस् कारकादन्यतरस्याम् । अष्टा० ५ । ४ । ४२ ॥

४. किमेत्तिङव्यय घादाम्वद्रव्यप्रकर्षे । अष्टा० ५ । ४ । ११ ॥

५. अमु च छन्दसि । अष्टा० ५ । ४ । १२ ॥

६. प्रतियोगे पञ्चम्यास्तसिः । अष्टा० ५ । ४ । ४४ ॥

७. तेन तुल्यं क्रियाचेद् वतिः, तत्र तस्येव, तदर्हम् । अष्टा० ५ । १ । ११५–११७ ॥

८. विनञ्भ्यां नानाञौ न सह । अष्टा० ५ । २ । २७ ॥

९. अभूततद्भावे कृभ्वस्तियोगे संपदय कर्तरि च्विः । अष्टा० ५।४।५०॥

साति = कृभ्वस्तियोगे, कात्स्न्र्येऽभिविधौ तदधीनवचने[1] । भस्मसात् कुरुते, ब्राह्मणसात् करोति ।

ता = तदधीनवचने देये[2] । देवत्रा वसति, मनुष्यत्रा गच्छति, पुरुषत्रा वसति ।

डाच् = अव्यक्तानुकरणां द्व्यजवरार्धात्[3] । पटपटा भवति, पटपटा करोति, दमदमा भवति, दमदमा स्यात् इत्यादि । एषां क्त्वादिप्रत्ययानामन्यविशेषोऽष्टाध्यायां द्रष्टव्य इति ।

---

१. विभाषा सति कात्स्न्र्ये । अष्टा० ५ । ४ । ५२ ॥

२. देवमनुष्यपुरुष पुरुमर्त्येभ्यो द्वितीया सप्तम्योर्बहुलाम् । अष्टा० ५।४ ५६॥

३. अव्यक्तानुकरणाद्व्यवरार्धादनितौ डाच् । अष्टा० ५ । ४ । ५७ ॥

!! ओ३म् !!

आर्यसमाज के नियम

१—सब सत्य विद्या और जो पदार्थ विद्या से जाने जाते हैं उन सब का आदि मूल परमेश्वर है।

२—ईश्वर सच्चिदानन्दस्वरूप, निराकार, सर्वशक्तिमान्, न्यायकारी, दयालु, अजन्मा, अनन्त, निर्विकार, अनादि, अनुपम, सर्वाधार, सर्वेश्वर, सर्वव्यापक, सर्वान्तर्यामी, अजर, अमर, अभय, नित्य, पवित्र और सृष्टिकर्त्ता है, उसी की उपासना करनी योग्य है।

३—वेद सब सत्य विद्याओं का पुस्तक है। वेद का पढ़ना पढ़ाना और सुनना सुनाना सब आर्यों का परमधर्म है।

४—सत्य के ग्रहण करने और असत्य के छोड़ने में सर्वदा उद्यत रहना चाहिये।

५—सब काम धर्मानुसार, अर्थात् सत्य और असत्य को विचार करके करने चाहियें।

६—संसार का उपकार करना इस समाज का मुख्य उद्देश्य है, अर्थात् शारीरिक, आत्मिक और सामाजिक उन्नति करना।

७—सब से प्रीतिपूर्वक धर्मानुसार यथायोग्य वर्त्तना चाहिये।

८—अविद्या का नाश और विद्या की वृद्धि करनी चाहिये।

९—प्रत्येक को अपनी ही उन्नति से संतुष्ट न रहना चाहिये, किन्तु सब की उन्नति में अपनी उन्नति समझनी चाहिये।

१०—सब मनुष्यों को सामाजिक, सर्वहितकारी नियम पालने में परतन्त्र रहना चाहिये और प्रत्येक हितकारी नियम में सब स्वतन्त्र रहें॥

वेदाङ्गप्रकाश

(शुद्ध संस्करण)

वेदाङ्गप्रकाश के अभी तक जितने संस्करण छपे हैं उनमें व्याकरण आदि की बहुत सी अशुद्धियाँ हैं। इसलिये वेदाङ्गप्रकाश के शुद्ध संस्करण की कमी चिरकाल से अनुभव की जा रही थी। अतएव मण्डल की ओर से इसके शुद्ध, बुक साइज, छात्रोपयोगी टिप्पणियों और विविध सूचियों से युक्त संस्करण सुन्दर रूप से छपवाने की व्यवस्था की गई है। इसके निम्न ११ भाग मण्डल प्रकाशित कर चुका है। शेष ३ भाग भी शीघ्र ही प्रकाशित हो रहे हैं।

वर्णोच्चारण शिक्षा	≡	सौवर	।=)
सन्धि विषय	१)	आख्यातिक (अजिल्द)	४)
नामिक	।।।)	,, ,,	५)
कारकीय	।।=)	पारिभाषिक	।।।)
सामासिक	।।=)	धातुपाठ	।।=)
अव्ययार्थ	।)	गणपाठ	।।=)

प्रकाशक

आर्य साहित्य मण्डल लिमिटेड, अजमेर